# Matsyastutih

# મત્સ્યસ્તુતિઃ

## Document Information

Text title : matsyastutiH

File name : matsyastutiH.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# મત્સ્યસ્તુતિઃ

મગ્ને મેરૌ પતતિ તપને તોયબિન્દાવિવેન્દૌ
અન્તર્લીને જલધિસલિલે વ્યાકુલે દેવલોકે ।
માત્સ્યં રૂપં મુખપુટતટાકૃષ્ટનિર્મુક્તવાર્ધિ
શ્રીકાન્તસ્ય સ્થલજલગતં વેત્યલક્ષ્યં પુનાતુ ॥ ૧॥

વિયત્પુચ્છાતુચ્છોચ્છલિતજલગર્ભં નિધિરપાં
અપાન્નાથઃ પાથઃ પૃથુલલવદુસ્થો વિયદભૂત્ ।
નિધિર્ભાસામૌર્વો દિનપતિરભૂદૌર્વદહનઃ
ચલત્કાયે યસ્મિન્સ જયતિ હરિર્મીનવપુષા ॥ ૨॥

જીયાસુઃ શકુલાકૃતેર્ભગવતઃ પુચ્છચ્છટાચ્છોટનાત્
ઉદ્યન્તઃ શતચન્દ્રિતામ્બરતલં તે બિન્દવઃ સૈન્ધવાઃ ।
યૈર્વ્યાવૃત્ય પતદ્ભિરૌર્વશિખિનસ્તેજોજટાલં વપુઃ
પાનાધ્માનવશાદરોચકરુજાં ચક્રે ચિરાયાસ્પદમ્ ॥ ૩॥

દિશ્યાદ્વઃ શકુલાકૃતિઃ સ ભગવાન્નૈઃશ્રેયસીં સમ્પદં
યસ્ય સ્ફૂર્જદતુચ્છપુચ્છશિખરપ્રેઙ્ખોલનક્રીડનૈઃ ।
વિષ્વગ્વાર્ધિસમુચ્છલજ્જલભરૈર્મન્દાકિનીસઙ્ગતૈઃ
ગઙ્ગાસાગરસઙ્ગમપ્રણયિની જાતા વિહાયઃસ્થલી ॥ ૪॥

માયામીનતનોસ્તનોતુ ભવતાં પુણ્યાનિ પઙ્કસ્થિતિઃ
પુચ્છાચ્છોટસમુચ્છલજ્જલગુરુપ્રાગ્ભારરિક્તોદધેઃ ।
પાતાલાવટમધ્યસઙ્કટતયા પર્યાપ્તકષ્ટસ્થિતેઃ
વેદોદ્ધારપરાયણસ્ય સતતં નારાયણસ્ય પ્રભોઃ ॥ ૫॥

જૃમ્ભાવિસ્તૃતવક્ત્રપઙ્કજવિધેર્હૃત્વા શ્રુતીઃ સાગરે
લીનં ત્રસ્તસમસ્તનક્રનિકરં શઙ્ખં જઘાનાજિરે ।
પુચ્છોત્ક્ષિપ્તજલોત્કરૈઃ પ્રતિદિશં સન્તર્પ્ય યો વૈ ધરાં
પાયાદ્વઃ સ મૃણાલકોમલતનુર્મીનાભિધાનો હરિઃ ॥ ૬॥

હંહો મીનતનો હરે કિમુદધે કિં વેપસે શૈત્યતઃ
સ્વિન્નઃ કિં વડવાનલાત્પુલકિતઃ કસ્માત્સ્વભાવાદહમ્ ।
ઇત્થં સાગરકન્યકામુખશશિવ્યાલોકનેનાધિક-
પ્રોદ્યત્કામજચિહ્નનિહ્નુતિપરઃ શૌરિઃ શિવાયાસ્તુ વઃ ॥ ૭॥

પુચ્છં ચેદહમુન્નયામ્યનવધિસ્તુચ્છો ભવેદમ્બુધિઃ
ક્રીડાં ચેત્કલયે મનાગપિ જલે પીડા પરં યાદસામ્ ।
નિસ્પન્દો ભૃશમામૃશન્નિતિ ભરબ્રહ્માણ્ડભાણ્ડક્ષય-
ક્ષોભાકુઞ્ચિતવેષ એષ ભગવાન્પ્રીણાતુ મીનાકૃતિઃ ॥ ૮॥

ચન્દ્રાદિત્યોરુનેત્રઃ કમલભવભવસ્ફારપૃષ્ઠપ્રતિષ્ઠો
ભાસ્વત્કાલાગ્નિજિહ્મઃ પૃથુલગલગુહાદૃષ્ટનિઃશેષવિશ્વઃ ।
અદ્ભિઃ પુચ્છોત્થિતાભિશ્ચકિતસુરવધૂનેત્રસંસૂચિતાભિઃ
મત્સ્યશ્છિન્નાબ્ધિવેલં ગગનતલમલં ક્ષાલયન્વઃ પુનાતુ ॥ ૯॥

યં દૃષ્ટ્વા મીનરૂપં સ્ફુરદનલશિખાયુક્તસંરક્તનેત્રં
લોલદ્વિસ્તીર્ણકર્ણક્ષુભિતજલનિધિં નીલજીમૂતવર્ણમ્ ।
શ્વાસોચ્છ્વાસાનિલૌઘૈઃ પ્રચલિતગગનં પીતવારિં મુરારિં
દિઙ્મૂઢોઽભૂત્સ શઙ્ખઃ સ ભવતુ ભવતાં ભૂતયે મીનરૂપઃ ॥ ૧૦॥

દિઙ્મૂઢં તં સુરારિં કિલ શિતદશનૈઃ પીડ્યમાનં રટન્તં
હૃત્વા તીરે પયોધેઃ કરતલકલિતં પૂરયામાસ શઙ્ખમ્ ।
નાદેનાક્ષોભ્ય વિશ્વં પ્રમુદિતવિબુધં ત્રસ્તદૈત્યં સ દેવૈઃ
દત્તાર્ઘઃ પદ્મયોનેઃ પ્રહસિતવદનઃ પાતુ વો દત્તવેદઃ ॥ ૧૧॥

ઇતિ મત્સ્યસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Matsyastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*